# Shri Bala Karpura Stotram

# શ્રીબાલાકર્પૂરસ્તોત્રમ્

## Document Information

Text title : Shri Bala Karpura Stotram

File name : bAlAkarpUrastotram.itx

Category : devii, dashamahAvidyA, devI

Location : doc_devii

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description/comments : bAlAsaparyA saparyAkrama-nAmAvalI-stotrAdisaNgrahaH, Paratantra

Latest update : March 21, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 22, 2020

*sanskritdocuments.org*

# શ્રીબાલાકર્પૂરસ્તોત્રમ્

કર્પૂરાભેન્દુગૌરાં શશિસકલધરાં રક્તપદ્માસનસ્થાં
વિદ્યાપાત્રાક્ષમુદ્રાધૃતકરકમલાં ત્વાં સ્મરન્સન્ ત્રિલક્ષમ્ ।
જપ્ત્વા ચન્દ્રાર્ધભૂષં સુરુચિરમધરં બીજમાદ્યં તવેદં
હુત્વા પઞ્ચાત્પલાશૈઃ સ ભવતિ કવિરાડ્ દેવિ બાલે મહેશિ ॥ ૧॥

હસ્તાબ્જૈઃ પાત્રપાશાઙ્કુશકુસુમધનુર્બીજપૂરાં દધાનાં
રક્તાં ત્વાં સંસ્મરન્સન્ પ્રજપતિ મનુજો યસ્ત્રિલક્ષં ભવાનિ ।
વામાક્ષી ચન્દ્રસંસ્થં ક્ષિતિસહિતવિધિં કામબીજં તવેદં
ચન્દ્રૈર્હુત્વા દશાંશં સ નયતિ સકલાન્ વશ્યતાં સર્વદૈવ ॥ ૨॥

વિદ્યાક્ષજ્ઞાનમુદ્રાઽમૃતકલશધરાં ત્વાં મનોજ્ઞાં કિશોરીં
સ્મેરાં ધ્યાયંસ્ત્રિનેત્રાં શશધરધવલાં યો જપેદ્વૈ ત્રિલક્ષમ્ ।
જીવં સઙ્કર્ષણાઢ્યં તવ સુરનમિતે સર્ગયુક્તં સુબીજં
હુત્વાઽન્તે માલતીભિર્ભવતિ સ લલિતે શ્રીયુતો ભોગવાંશ્ચ ॥ ૩॥

ધ્યાયંસ્ત્વાં પુસ્તકલાક્ષાભયવરદકરાં લોહિતાભાં કુમારીં
કશ્ચિદ્યઃ સાધકેન્દ્રો જપતિ કુલવિધૌ પ્રત્યહં ષટ્સહસ્રમ્ ।
માતર્વાઙ્મારશક્તિપ્રયુતમનુમિમં ત્ર્યક્ષરં ત્રૈપુરં તે
ભુક્ત્વા ભોગાનનેકાન્ જનનિ સ લભતેઽવશ્યમેવાષ્ટસિદ્ધીઃ ॥ ૪॥

આરક્તાં કાન્તદોર્ભ્યાં મણિચષકમથો રત્નપદ્મં દધાનાં
વાઙ્માયાશ્રીયુતાન્યં મનુમયિ લલિતે તત્ત્વલક્ષં જપેદ્યઃ ।
ધ્યાયન્ રૂપં ત્વદીયં તદનુ ચ હવનં પાયસાન્નૈઃ પ્રકુર્યાદ્-
યોગીશસ્તત્ત્વવેત્તા પરશિવમહિલે ભૂતલે જાયતે સઃ ॥ ૫॥

વાણી ચેટી રમા વાગ્ભવમથ મદનઃ શક્તિબીજં ચ ષડ્ભિઃ
એતૈશ્ચન્દ્રાર્ધચૂડે ભવતિ તવ મહામન્ત્રરાજઃ ષડર્ણઃ ।
જપ્ત્વૈનં સાધકો યઃ સ્મરહરદયિતે ભક્તિતસ્ત્વામુપાસ્તે
વિદ્યૈશ્વર્યાણિ ભુક્ત્વા તદનુ સ લભતે દિવ્યસાયુજ્યમુક્તિમ્ ॥ ૬॥

મહાબિન્દુઃ શુદ્ધો જનનિ નવયોન્યન્તરગતો
ભવેદેતદ્બાહ્યે વસુછદનપદ્મં સુરુચિરમ્ ।
તતો વેદદ્વારં ભવતિ તવ યન્ત્રં ગિરિસુતે
તદસ્મિન્ ત્વાં ધ્યાયેત્ કહરિહરરુદ્રેશ્વરપદામ્ ॥ ૭॥

નવીનાદિત્યાભાં ત્રિનયનયુતાં સ્મેરવદનાં
મહાક્ષસ્રગ્વિદ્યાઽભયવરકરાં રક્તવસનામ્ ।
કિશોરીં ત્વાં ધ્યાયન્નિજહૃદયપદ્મે પરશિવે
જપેન્મોક્ષાસ્ત્યર્થં તદનુ જુહુયાત્ કિંશુકસુમૈઃ ॥ ૮॥

હૃદમ્ભોજે ધ્યાયન્ કનકસદૃશામિન્દુમુકુટાં
ત્રિનેત્રાં સ્મેરાસ્યાં કમલમધુલુઙ્ગાઙ્કિતકરામ્ ।
જપેદ્દિગ્લક્ષં યસ્તવ મનુમયો દેવિ જુહુયાત્
સુપક્વૈર્માલૂરૈરતુલધનવાન્ સ પ્રભવતિ ॥ ૯॥

સ્મરેદ્ધસ્તૈર્વેદાભયવરસુધાકુમ્ભધરિણીં
સ્રવન્તીં પીયૂષં ધવલવસનામિન્દુશકલામ્ ।
સુવિદ્યાસ્ત્યૈ મન્ત્રં તવ હરનુતે લક્ષનવકં
જપેત્ત્વાં કર્પૂરૈરગરુ સહિતૈરેવ જુહુયાત્ ॥ ૧૦॥

સહસ્રારે ધ્યાયન્ શશધરનિભાં શુભ્રવસનાં
અકારાદિક્ષાન્તાવયવયુતરૂપાં શશિધરામ્ ।
જપેદ્ભક્ત્યા મન્ત્રં તવ રસસહસ્રં પ્રતિદિનં
તથારોગ્યાસ્ત્યર્થં ભગવતિ ગુડૂચ્યૈઃ પ્રજુહુયાત્ ॥ ૧૧॥

કુલજ્ઞઃ કશ્ચિદ્યો યજતિ કુલપુષ્પૈઃ કુલવિધૌ
કુલાગારે ધ્યાયન્ કુલજનનિ તે મન્મથકલામ્ ।
ષડર્ણં પૂર્વોક્તં જપતિ કુલમન્ત્રં તવ શિવે
સ જીવન્મુક્તઃ સ્યાદકુલકુલપઙ્કેરુહગતે ॥ ૧૨॥

શિવે મદ્યૈર્માંસૈશ્ચણકવટકૈર્મીનસહિતૈઃ
પ્રકુર્વંશ્ચક્રાર્ચાં સુકુલભગલિઙ્ગામૃતરસૈઃ ।
બલિં શઙ્કામોહાદિકપશુગણાન્યો વિદધતિ
ત્રિકાલજ્ઞો જ્ઞાની સ ભવતિ મહાભૈરવસમઃ ॥ ૧૩॥

મનોવાચાગમ્યામકુલકુલગમ્યાં પરશિવાં

સ્તવીમિ ત્વાં માતઃ કથમહમહો દેવિ જડધીઃ ।
તથાપિ ત્વદ્ભક્તિર્મુખરયતિ માં તદ્વિરચિતં
સ્તવં ક્ષન્તવ્યં મે ત્રિપુરલલિતે દોષમધુના ॥ ૧૪॥

અનુષ્ઠાનધ્યાનાર્ચામનુ સમુદ્ધારણયુતં
શિવે તે કર્પૂરસ્તવમિતિ પઠેદર્ચનપરઃ ।
સ યોગી ભોગી સ્યાત્ સ હિ નિખિલશાસ્ત્રેષુ નિપુણઃ
યમોઽન્યો વૈરીણાં વિલસતિ સદા કલ્પતરુવત્ ॥ ૧૫॥

બાલાં બાલદિવાકરદ્યુતિનિભાં પદ્માસને સંસ્થિતાં
પઞ્ચપ્રેતમયામ્બુજાસનગતાં વાગ્વાદિનીરૂપિણીમ્ ।
ચન્દ્રાર્કાનલભૂષિતત્રિનયનાં ચન્દ્રાવતંસાન્વિતાં
વિદ્યાક્ષાભયધારિણીં વરકરાં વન્દે પરામમ્બિકામ્ ॥ ૧૬॥

ઇતિ શ્રીપરાતન્ત્રાન્તર્ગતં શ્રીબાલાકર્પૂરસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*Shri Bala Karpura Stotram*

pdf was typeset on March 22, 2020

Please send corrections to *sanskrit@cheerful.com*